No 413 of 1875

1115.

॥ श्रीराम जन्म भाणम् ॥

GOVERNMENT
1875
N.W.P.

श्रीकाशीराज पौत्र जन्म महोत्सवे द्वादशाहिक

यथावृत्तेति वृत्त मूलं ।

श्रीताराचरण शर्म्म प्रणीतम् ।

शक नरपते: १७९७

सम्वत्सरे ।

C. lyd

निउमेडिकेल हलाख्य यन्त्रालये मुद्रितम् ।

दशाश्वमेध घाट काशीधाम ।

मूल्य ६ आना ।

॥ श्रीराम जन्म भाणम् ॥

श्रीकाशीराज पौत्र जन्म महोत्सवे द्वादशाहिक

यथावृत्तेति वृत्त मूलं ।

श्रीताराचरण शर्म्म प्रणीतम् ।

शक नरपतेः १७९७

सम्बत्सरे ।

निउमेडिकेल हलाख्य यन्त्रालये मुद्रितम् ।

दशाश्वमेध घाट काशीधाम ।

॥ विज्ञापनम् ॥

स्वस्ति श्री परमेश्वरी कृपापात्र परमोदार चरित्र विविध विरुदावली विराजमान मानोन्नत राजाधिराज महाराज द्विजराज वेत्रवतीराज श्रीराजेन्द्र किशोर सिंह वीर पुङ्गव धर्म्मपाल धर्म्मराज कल्प कलि कल्प पादप अत्र श्रीमत् कुल दौहित्र कुलाङ्कुराभ्युदय महोत्सवे श्रीमता काशी राजेन द्वादश दिनानि यावद् यावदानन्द जात मनुभूतं प्रत्यक्षतः, राज कार्य्ये व्यापृतेन तदानीमत्रागन्तु मसमर्थेन श्रीमता तमानन्दं साक्षादन- नुभवता वश्यमेव यद् दुःख मधिगतं तदुपशमाय साक्षात् तदानन्दा नुभवायच यथावत् तदुत्सव चित्र मत्र निबद्धं तदेतदवलोक्य तदानीन्तन सुख जातानि साक्षादनुभूय प्रसन्नो मदीय श्रमं सफलयतु श्रीमानितिशम् ॥

ताराचरण शर्म्मणः

॥ श्रीराम जन्म भाणम् ॥

साक्षादेव शरत् शशी नयनयोरानन्द कन्दाम्बुधि

र्दुःखध्वान्त विनाश भास्कर रुचिर्मे देहिमे देहिच ।

एवं राज पुरेषु राजरमणी वृन्देण कोलाहलै

राक्रान्तो मृदुहास काशि वदनो रामः शिशुः पातुवः ॥

नान्द्यन्ते सूत्रधारः

सूत्र। समन्तादवलोक्य, अरे अद्य किमेतत् खर्व्वीकृत काल जलद गभीर नाद भेरी तूरी पटह मृदङ्गादि वाद्य निवहध्वान वर्द्धितः, कुञ्जी कृत वन विहङ्ग कूजित स्वराङ्गी वेणु वीणादि यन्त्र मधुर रणन रमणीयान्तरः, पृथुनितम्बभार धीर सलील सञ्चार सञ्चालित पञ्चशर शर निकर वार विलासिनी सहस्र सादर कुटिल कटाक्ष कवलीकृत कोकिल कुहुरव कलनाद पीयूष कृत प्लावनः

प्रसाद पूर्ण वदन वेग धावमान पौर जन निचयानन्द हास विजृम्भितः, शतघ्नी शत निनादः सतत माकाश मण्डल माकुल यति तदहं तर्कयाम्यवश्य मिदानी मन वधिकृत् सवः कश्चिदुल्लासयति राज कुलम् । तत् किमस्य बीजम्। आकाशे कर्ण दत्वा; अये किं कथयसि स्वस्ति विविध विरुदावली विराजमान मानोन्नत गौतम वंशावतंस राजाधिराज महाराज द्विजराज काशीराज श्रीमदीश्वरी प्रसाद नारायण सिंह वीरपुङ्गव धर्म्म पालानां कुमारस्येव कुमारस्य युवराज श्रीप्रभुनारायण सिंह

शर्म्मणः कुल कल्प पादपाङ्कुरीभूतः श्रीमान् नव कुमारोजात इति अरे साधुरे साधु प्रियंमे प्रियम्।

यतः। दारिद्र्य दवदग्धस्य, भक्ष्यमात्रं प्रपित्सतः।
निधिरेष महापद्मः, स्वयमाप्तः करंरयात्॥

(पुनराकाशे) अरे किं कथयसि किमस्यतात् पर्वमिति श्रूयतां वैदेशिकोहं नटः कार्य्य वशादि दानीं काशिकः सम्वृत्तः पुरासीत् सङ्कल्पश्चिरं तावदस्मिन् रसभाव वारिधि पारग श्रीमन्महाराज काशीराजस्याभिरूप भूयिष्ठे सदसि रूपकेषु केनचिदभिनीय प्रसादयितव्याः सभ्या इति किन्त्ववसर प्रेक्षणीया राजान इत्यवसर मन्वेषयतो महानेवावसरः स्वय मुपतिष्ठति अतोहं पठामि दारिद्र्य दवदग्धस्येत्यादि।

(पुनराकाशे) अहो किं कथयसि अस्मिंस्तावद्वेदवेदाङ्ग वेदान्त सांख्य पातञ्जल न्याय मीमांसा वैशेषिक काव्य कलालङ्कारादि सकल विद्या वारिधौ कथं प्रसादयितव्याः सभ्या इति साहसन्ते वालचेष्टितस्येति सत्य माचिन्तोस्मि किन्त्ववधार्य्यताम्

कलाकुशलनागर्य्याः कटाक्ष रसभावुकाः।
नास्वादयन्तिवनभू हरिणी मधुरेक्षणम्॥

(पुनराकाशे) भ्रातरेवञ्चेद गम्यतां राजसदः किन्त्वत्र जिज्ञासते किमभिनेतव्य मिति श्रूयतां श्रीकाशीराज सभासदा वशिष्ठ वंश रत्नाकर समुद्भूतेन श्रीतारा चरण शर्म्मणे दानी मेवास्मदनुजिघृक्षया प्रणीयमानं सरस भणन प्रधानं सहृदय समाज हृदयानन्दकन्दभूतं श्रीरामजन्म नाम भाणमिति।

(पुनराकाशे) अरे किं कथयसि कालिदास श्रीहर्ष भवभूति प्रभृति

महाकवि विरचित काव्यरस परिपूरित श्रवणान्तरः श्री काशीराजः कथमाधुनिक रसभाव कल्पना विहीन रचनया सन्तोषमेष्यति पीयूष पान हीन पिपासइव वर्षोदकेष्विति सत्यमेतत् श्रूयतान्तावत्।

रामायणादि पीयूष, सिन्धु मज्जन तर्पिताः।
सन्तोभवन्ति नहिकिं, शुकभाषित सादराः॥

अथवा सर्वः खलुकान्त मात्मीयं पश्यति

तथाहि। राजाङ्गजो यदिच काञ्चनरत्नभूष, चन्द्राननः सुरभिवेशसुरञ्जिताशः
तातस्तथापिरजसा परिधूषराङ्गं चीराम्बरं स्वतनयं हृदयेविभर्त्ति॥

(पुनराकाशे) यद्येवं तत् त्वरय त्वरय प्रसन्नस्ते महाराजः सफलायासो भविष्यसि।

यतः। गतवतिभोजेत्रिदिवे, समुदयत्येष कविजन रक्षणाय।
भास्कर विरह विषन्नं, प्रसादयति नवोदितः कुमुदेशः॥

अहो किमेवं ब्रूषे राजपुरे महोत्सवारम्भो जातः वृथा समयपातेन वयं गच्छाम स्त्वमपित्वरयेति गच्छ गच्छ अहमपि गच्छामि नयनं सफलयितुम् (पदान्तरेगत्वा) अरे कुशीलवाचार्थस्तावदस्माकं नेता कृत नेपथ्य विधानः प्रविशति रसनायकः अस्तुतावदनेन प्रविश्यावलोकयामि सर्वमिति निष्क्रान्तः।

प्रस्तावना।

ततः प्रविशति रसनायकः

रस। विलोक्य सविस्मयम्!

शुक्ला तिथिर्हि नवमी शुभदा ग्रहौघा
औचित्य मेतदखिलं खलुराम भूतौ।
कालः कथं तुहिन एष समेति सद्यो
नीहार रञ्जित सुधाकर साधितश्रीः॥

पदान्तरे गत्वाग्रतो दृष्ट्वा कस्तावदसौ प्रशान्त वेषो महर्षिरिव दृश्यते भवतुतावदेनं पृच्छामि भगवन् कथं रामजन्मनि तुहिनएष कालः अस्तमितो वाभास्वान् किमेवं कथयसि ।

श्रीरामचन्द्र वदनेन्दु विलोकनेन, प्रोज्झित सीम परिमोचि सुखाम्बु राशेः।
वाताहतासु कणिका हिमता मुपेत्य मार्त्तण्डमेन मसृतांशु रुचिं विधत्ते॥

(श्रुत्वा विचिन्त्य) प्रभूणामुद्भवे सर्वं मेव सम्भवति भगवन् किन्त्वहमेवं सम्भावयामि

तथाहि। मार्त्तण्डचण्डकरजालविकाशिताशे, कालेप्रभूयविभुरुत्कटतापहेतुः।
आसीत्तदद्यपुनरेवसदाप्रमोदं, दातुंप्रभोः(१) प्रभुरयंतुहिनेप्रभूतः।

किम्ब्रवीषि नित्य रूपस्य प्रभोरनन्तलीलस्य सदावतारो वेदरक्षणाय यदस्त्वमत्रतिष्ठगुणानु रूपं फलं लभ्यते अथवा काव्यगुण विचारः

यतः। रत्नाकरो नरपतिर्द्विजराज जन्म, संलोकनेनभविता यतएव हृष्टः।
तिष्ठेत्तदाक्षभुवनेविततोषरश्री,(२) र्यःस्यान्नपूर्णकमलो(३)वसुधातलेषु।

अहमिदानीं गच्छामि श्रीमते महाराजाय कुमार जन्मनो (४) जात कर्म सम्पादनाय विज्ञापयितु मिति। गच्छतुभवान् समुचितमग्रेधर्म्म संरक्षणं भूपतीनां यतोराज संरक्षणीय एव लोकानां धर्म्म मार्गः किन्त्वत्र निवेद्यते

---

(१) प्रभोरीश्वरयात् पक्षे प्रभु नारायण सिंहात् कुमारात् भीमसेनस्य भीमवन्नामैक देशस्तद्वाचकः ।
(२) विततोषरश्रीः विततोऽषरस्य क्षारमृत्तिकायाः पक्षे ऊषरस्येवश्रीर्यैन।
(३) कमला लक्ष्मीः कमलं जलम् ।
(४) कुमारस्य रामस्य जन्मनः पक्षे कुमाराज्जन्म यस्य श्रीकाशीराजपौत्रस्येति यावत् ।

श्चर्त्तव्याः समये वयं राजपुरुष, अहमपि गच्छामि आनन्दो चित वेशं महा राजंद्रष्टु मिदानीम् (पदान्तरे गत्वा सविस्मयं) अरे कुत्रे दानीं महाराजः।

यतः। सर्वत्र लोक मयता सकलालयेषु
प्रोद्दीप्त वेष परिभूषित राजरूपाः।
सर्वत्र नृत्यति वधूर्नव वेष भूषा
सर्वत्र मङ्गल कलः सुरलोक गामी॥

(आकाशे) किं कथयसि दर्शकाधम कुतस्तेमति भ्रंशः नखलु महाराज भ्रमः सर्वत्र भवितुमर्हति।

यतः। स्वस्वभासात्तभासेषु ग्रहेषु गगनान्तरे।
नहिकश्चित्सुधाभासो भासमर्हति भास्वरः॥

अग्रे गच्छ नयनं सफलय दर्शन मात्रेणज्ञास्यसि महाराजोऽयमिति

यएषः। प्रसन्न मुखपङ्कजो भषित लिप्त भालस्थलो
महामुनि सम प्रभो जित करीन्द्र मन्दागमः।
भ्रमः स्वयमुपागतः किमुत देव देवः स्वयं
यदीक्षण मिमांमतिं जनयति प्रसादाम्बुधिः॥

अधुनैव लोक नियन्ता श्रीमान क्षत नित्य क्रियः कलुष कुल कवल काल रात्रि श्रीमहाकाली मन्दिरे प्रविष्टः प्रथममेव श्रीगुरुमर्चयितुं पादुका प्रान्त भागे क्षतासन परिग्रहो ध्यायतीति भवत्वेवमुक्त्वा कुलस्य मति भ्रंशोजातः क्षन्तव्योऽपराधः (पदान्तरे गत्वा सविस्मयम्) अहो किमद्भुत दर्शनं श्रीगुरु पादुका प्रान्त देशेऽर्द्ध मुकुलित नयनेन बद्धासनस्य योगि राजस्य राजर्षेः।

अरे किमेतत् पश्यति प्रसन्न वदनैर्विनीत वेशैः कलनादेन कनक कुण्डल धरैः पुरुषैः

तथाहि । उत्तिष्ठ पश्य परिमुञ्च समाधि शर्म्म
पादार्च्चने रत गुरोः श्रम भार लभ्यम् ।
अन्तः सुखं स्वतनु जन्म परम्परातः (१)
साक्षा द्विराजति विभोश्चरणार्च्चनेन ॥

अपिच । वंशाङ्कुरं प्रथित भूपति वंश भूष
धर्म्मात्मनां विमल मानस राज हंसः ।
राज प्रभाभि (२) रुदयं ललति कुमार
आनन्द सिन्धु परिवर्द्धन सज्जनानाम् ॥

अपिच । रामायणं (३) फलयितुं नव राम रूपो
रामः (४) स्वयं तव गृहे वसुधाधि नाथ ।
जातो विलोकय इत्थं फलिनीं विधेहि
सिद्धे फले किमुतवा तपसः श्रमेण ॥

साधु भगवन्तः पश्यतां पुनः पश्यतां पश्चिमे वयसिकुल मूल भौरुकस्यकुलो दय मङ्गलगीतिका ।

(विलोक्य) अहह किमाश्चर्य्यं किमाश्चर्य्यं, उत्थाय श्रीगुरु मन्दिर द्वारि समुपस्थितस्य किं, किं, कुमारी जातः, कुमारो जातइति सादर मृदुवचन स्मित वदन मानस्य श्रीमन्महाराजस्य ।

---

(१) आत्मा वै जायते पुत्र इति श्रुतिः तनुजन्मनः परम्परा शुक्ररूपेण ।
(२) राज प्रभा राज कान्तिः चन्द्रकान्तिश्च ।
(३) अस्मिन् वर्षे रामायणस्य टीका श्रीमता समारब्धा तत् फलयितुं फलवत् कर्तुं ।
(४) रामः परमेश्वरः पक्षे राज्ञामी श्वरां शत्वात् समर्थनम् ।

कश्चिद्गलाद्रत्न हारं, कश्चिच्च बलयं करात्।
उत्तरीयं तथा कश्चिद, यथेच्छं हरतिद्विजः॥

गृहाणरे गृहाण एवमवसरो नचिर सुलभः (समन्तादवलोक्य सविस्मयं) अरे किमेतत्पश्यतएवमे चतुर्दिक्षुलोकाम्बुधिरूच्छलितइवराजकुलंविप्लावयति

श्यामः किं कुर्म्मो प्रबल तम धर्म्मावृत तनु
र्निरुद्धा निश्वासा स्तिमिर मय भासोऽखिलदिशः।
तनुः पिष्टा छिन्नं पिहित वसनं शुष्क रसना
शिशु वृद्धो नारीनर इह समस्ताः समदशाः॥

(नेपथ्ये सोच्चैः)

बध्या घातन विच्युताः परिहृताः कारागृहे रोधिता
मोच्या द्वारि निरोधिता नयनयोर्दूरं गता लोकिताः।
स्वस्व स्थानमुपागता हत पदाः सन्तु प्रभोराज्ञया
श्रीमज्जन्म महोत्सवेन परमं सन्तुष्यतः श्रीमतः॥

(पुनर्नेपथ्ये) सावधानं सावधानं जन समाजो द्वार मर्य्यादा मतीत्य राजपुरं विप्लायति।

(पुनर्नेपथ्ये) दीयतां दीयतामिति। अहो जीवामि शान्तः कोलाहलः अहो धनस्य महिमा।

पङ्गुर्धावति लुण्ठनेन धरणी पृष्ठस्य काणस्तथा
नारी क्रोड़ गतं बिहाय तनयं सद्यः प्रसूतं बलात्।
रोगी रोग भवं विसृज्य विषमं क्लेशं महावेगवान्
देय देय मिति ब्रुवन् परिभवन्नन्योन्य माविगतः॥

अरे रथरस एते मत्त वाजिनः कोलाहलोद्भ्रान्त, सत्वा ह्रेषारवैर्धरणी मुत्

क्रामयन्तः पादाघातेन विनाशयन्ति (द्रुत पदं गत्वा) राम जीवितोऽस्मि तव करुणापातैर्गत प्रायं जीवितं वद्घावाजिनः धन्यरे धन।

इदं हन्तिजनान् सर्व्वा, निर्दरत्यति सङ्कटात्।
इदमेव भवान्धनां जीवनं मरणं तपः॥

उचित मेतत्। यतः।

यैर्मुग्धचित्ता विषये भ्रमन्ति, इष्टापि दीषानल दाहजातम्।
ते स्पर्शगन्धार सरूप शब्दाः, साध्यायदेभिर्नगतिः परास्ति॥

(नेपथ्ये)

नोत्यातु मर्हामि धनस्य भारै, र्गृहाण किञ्चिद् यदि वासि मित्रम्।

राम शान्त कल कलः गतायाचकाः कथं गता धनभारेण गन्तुम समर्था किं कथयसि

प्रदाय दीनायप्रयान्ति सर्वे, सिन्धोर्गृहीत्वेव घनाः पयांसि। इति।

(अग्रतो गत्वा विलोक्य) किमाश्चर्य्यं दर्शनमासां मङ्गलाय समागतानां बारविलासिनीनाम् यथैताः।

अभ्रः पूर्ण नवीन पल्लवलसद् दध्यक्षत प्लावितान्
शीर्षे हेमघटान् विधाय कलया मातङ्ग मन्दागमाः।
ईषदङ्किमनेत्र मुग्ध हसिता वेषादि भिर्भूषिता
गीतैर्मङ्गल मञ्जुलैर्मधुलिहामुल्लाय यन्त्यः कलम्॥

अपिच। शीर्षे हेम घटस्य पातन भिया प्रोद्भूत पाणिद्वयात्
पीन प्रोन्नत चीनचौर पिहित व्यक्तस्तनाम्भोरुहाः।
कामः साधित कामनः सुखमना भारैः समस्तैर्निजैः
कर्त्तुं जन्मसयं प्रभोर्महमसुंयाति स्वयं सज्जितः॥

(पार्श्वतोविलोक्य) एतदप्यद्भुत दर्शनमासां ग्राम बधूनाम्। यथैताः

अश्वत्सात्त्विक दर्शनैः सुख भरैरानन्द वारि द्रवैः
शीर्षे पाणितले विपाक जननैर्नव्यैः पुरासम्भवैः।
भारैः काल समुद्भवैश्च पयसां दध्नां घटानां तथा
ग्रास्यैः सात्त्विक पूर्वभाव ललितैर्माङ्गल्य कोलाहलैः।

अपिच

वृद्धानां परिपक्व केश विल सङ्कालस्थल प्रोल्लसत्
सिन्दूर प्रजुषांप्रशासन रताः पंक्त्याच पंक्त्या गताः।
माता वृद्ध तनुः प्रयाति कमला नाना वपुर्धारिणी
जात क्षेमयितुं सहस्र नयनैर्द्रष्टुं सकृत् श्रीधरम्॥

(पदान्तरेगत्वाबिलोक्यसविस्मयं) अहो किमद्भुत दर्शनमधुना दुर्गप्राङ्गनस्य लोहित वसन परिभूषित मण्डलाकार दण्डायमान प्रचण्ड पुरुष निचय सादर समुत्साह समाहतसैनिक वाद्यध्वान समाकर्णननरी नृत्यमान हेमरौप्य निर्म्मित मञ्जीर बल्गादि प्रसाधित तुरङ्गम सहस्रस्य।

अरुण वर्ण वर्म्मादि समालम्बन तिरस्कृत बसन्त पलास पादप कुरु वनश्रेणीभूत पदाति निचय सञ्चालित लौहदण्डमय दहनास्त्र सधूमध्वानमन्दी कृत काल जलद गभीर निनादस्य।

शिल्पीकृत चीन बसन पताका परिशोभित हेम रौप्यगजदन्तादि निर्म्मित विविधाकृति बिचित्र पृष्ठासन समलङ्कृत पृष्ठदेश धरणीतल लम्बमान शिल्पित शोणित बसन पिहित पार्श्वयुग चित्रित गण्डस्थल करि निकर निश्वास निर्गत बारि निचय परिभूत वर्षा समयाति पातस्य। अस्मिन् चर्णेहि

क्रूरैः पामर राक्षसैरधिकृतैर्नीताचुर्गतिं कातराः

श्रुत्वा जन्म बिभोर्बिपज्जल निधेः सन्तारणार्थं पुनः ।
कर्त्तुं जन्ममयं महोत्सवम मुंद्दष्टादिशामीश्वराः
सम्भारैः समलङ्कृते रूप गताः किंस्विन्मही मण्डलम् ॥

(पदान्तरे गत्वा बिलोक्य सबिस्मयम्) अहो तरङ्गित लोकाम्बुधि मध्या- दुद्भूतद्द्वापरो दिङ्मातङ्गो दृश्यते किमस्य बीजम् । अस्मिन् समये करि- चालन मनुचितं कदाचिल्लोका हति भविष्यति (आकाशे) अरे किं कथयसि शिचितोऽयं गजः नभेतव्यं नभेतव्यम् अस्मिन् समये तावदन्यथा लोक शान्तिरस्तुलभेति मातङ्गा रूढ़ा धनानिवर्षन्तीति साधु दृष्यन्तां किन्तु

नराशिः सञ्चदादाय, दातव्यः चेममिच्छता ।
तदाघात बसात्कश्चि, ल्लोकघाती भबिष्यति ॥

सम्प्रति वहिरतीव जनता दृश्यते शरीरमपि विकलं तदधुना महाराज समीप एवगन्तव्यम् येनराजानः सर्व्वास्ववस्थासु सममानन्दभोगिनो भवन्ति (पदान्तरे गत्वा)

अहो

नयन मनोहर कोमल राङ्कव तल्प तलार्पित शोभं
मणिमय भूषण वसन समाश्रय साधित लोचन लोभम् ।
सुरपति मिवनरपतिमविरामं
लोचन लोकय लोकनपूरित याचक सञ्चय कामम् ॥ १ ॥

ध्रुवम्

नवकुल भूषस जन्म महोत्सव मङ्गल गान समेतं
युवतिनिचय रस ताण्डव पूरित मन्मथ रङ्ग निकेतम् ॥ २ ॥
अभिनव पल्लव मेलन मीलित सुरभि समय सुखलेहं

हृतमणि गौरव दीप निचय परिभावित मङ्गल गेहम्॥३॥

कुलगुणगायि वर्षवर नर्त्तन दर्शन वर्द्धित हर्षं

हैमदण्डधर सुन्दर भूषण रचक रचित पार्श्वम्॥ ४ ॥

फल कुसुमादिक कर नर सुरवर योजित मङ्गल वादं

निर्जित किन्नर बन्दि पठित कुलकीर्त्ति कवित्व निनादम्॥ ५॥

नवकिशलयगण फुल्लकुसुमचय भूषित सुरभित रङ्गं

मङ्गल भाजन मङ्गल गायन साधित मुदित तरङ्गम्॥६॥

स्मित मुख जन करल सदुपढौकन वर्द्धित सम्मद हासं

हेलन पूरित मुदित सुरेश्वर सज्जित मन्दिर भासम्॥ ७॥

कुलकमलाकर नवदिन नायक लोकन लोक विशोकं

निखिल पुराश्रय राम रामरव रञ्जित सुरपति लोकम्॥ ८ ॥

अत्रैतदद्भुतं येयदा गच्छंत्ति ते तदैतत् सदः स्वस्व देशमयतां श्रीमतोपि तत्तद्देशी यत्वं प्रतिपादयंति कोऽयं देशः महाराजोवा किं देशीयः (आकाशे) किं कथयसि अस्यांतावन्महा सभायां सर्व्वं देशीयास्तिष्ठंति श्रीमानपि सुतरां सर्व्वं देश भाषाभिज्ञः यतोः लोकेषु यत्रयन्म हत् तत् सर्व्वमेव राजभोग्यत्वेन ततः स्वय मुपागच्छतीति।

सत्यमेतत् नचेदेवं कथं राज सभेयं गीयते (पदांतरे गत्वा) अरे केतावदेते निर्गच्छंति।

यथैते। निःसार तत्त्व कवली कृत चित्त सत्त्वाः

प्रोद्दीप्त वेष परिभूषित पीन देहाः।

गर्व्व प्रमर्द्दित जनाः परितः प्रमत्तैः

सम्वेष्टिता जन गणैर्भव चक्र वाहैः॥

किं कथयसि, अरे दर्शकाधम किमेवं प्रलपसि एते राज पुरुषाः श्रीमता व्यवहार संरक्षणाय नियुक्ता एतेषामुपहासेन श्रोष्यन्तिचेदधुनैव निष्काशितो भविष्यसि मौनमास्थीयतामिति (सभयं) अजानता मपराधो मर्षयितव्यः विशेषतो नित्य मुत्सवावलोकनोत् कण्ठतस्य शयनाशन पान विपर्य्या सेनोत्कलित चेतसो मति भ्रंशोजातः साम्प्रतमेषा मवलोकनेनैवं प्रतिभाति

सत्यव्रता नीति पराति नम्राः सौजन्य वन्दी कृत लोक वृन्दाः।
साक्षात्स्तुष्यात्पर धर्म्मरूपा एते महान्तो विलसन्ति भाग्यात्॥

कथं नभवेत् श्रीमतो लोक नियन्तु राज्ञाचक्र चालकाः। यदस्तु पृच्छामि कथमेते व्यग्राश्चलन्ति "किं कथयसि" श्रीमतो राम रूपस्य जन्म महोत्सवाय समागतानां सम्बन्धि सुहृन्मिचादीनां भूपतिसामन्त मण्डलेश्वरप्रभृतीनां समुचित व्यवहार संरक्षणार्थं

यतः। श्रीमांश्चिदानन्दमयो निरङ्क एते भवन्ति प्रकृतीत्यभिख्याः।
यां यां क्रियामेन मभीच्यंति सएष तां तां भजते तथैव॥ इति।

एवञ्चेद् विविच्य नियोजनीया व्यवहारे पुरुषा येन चैतन्यं मलिनं नस्यात् यदस्तु साधु गच्छन्तु श्रीमन्तः व्यवहार संरक्षणमये गृहमेधिनां विशेषतो भूपतीनाम्

यतः। व्यवहार मयंबीज, मालम्बा भवपादपाः।
उत्पादयन्तिसततं सुखदुःख फलंनृणाम्॥

(पार्श्वतोऽवलोक्य) अरे केपुनरेते

मृद्विंदु लाञ्छित भुजोदर कण्ठभालाः
पीताम्बराः सशिख मुण्डित मुण्ड भाजः।
दृष्टि क्रिया वचन दाहित लोक वृन्दाः
साक्षाद् गणैः परिवृता मदमानदम्भाः॥

(आकाशे) "अरे किं कथयसि दर्शकाधम" एते राजमान्याः पण्डिता एतान् प्रत्यप्याक्षिपसि सत्वरं निष्क्रम श्रोष्यन्तिचेन्निष्काशयिष्यन्त्विति (सभयं विलोक्य) सत्यमपराडोस्मि पूज्येषु पूजातिक्रमेण

अतएव

मुक्तां विहाय बदरीफल माददानाः
शाखा मृगा निज पशुत्व फलं लभन्ताम्।
दोषं विसृज्य गुणमात्र मुपागतानां
साधु त्वमेव भुवने खलु सज्जनानाम्॥

वयमज्ञा अन्तस्तत्त्व परिज्ञान शून्याः कथं महात्मनां तत्त्वं जानीमः क्षन्तव्योपराधः (सभयं द्रुतपदं गत्वा सनिश्वासं) राम रक्षितोऽस्मि इदानीमेव विपदरण्ये पतित प्रायः अतएव महात्मानो जन समाज मतीत्य विजन गिरि गुहा सुनिवसन्ति (विचिन्त्य) अहो पश्यत एवमे बहु दिनान्यतीतानि किमाश्चर्यं सुखवा लोक कौतुकं कदाभास्वानुदेति कदावाऽस्तमेति किमपि न ज्ञायते यत्रयत्र यथायथा वलोकयामि तत्रतत्र तथाहृदयमभिनवं कृत्वा समाह्लयति यदस्तु यावदस्ति निश्वसितं तावदानन्द परि भोगाशयाः कुतो विश्रामः यान्तुवा प्राणा यावदुत्सवं विलोकयामि यतः दुर्लभः पुनरचिरमेवं कुशल दिवस समागमः (सन्मुखमवलोक्य) अरे कथमेते शुद्धान्ताभिमुखं गच्छन्ति "किं कथयसि" नजानासित्वं जात कर्म्म बाल समीप एव भवति सत्वन्तःपुर एवाभिवर्त्तते तेन तत्र जात कर्म्मोत्सवावलोकनाय राजपुरुषा अभीष्ट फल सिद्धयेच याचकाः प्रविशन्ति तवापि गन्तुमिच्छाचेद् गच्छ, अव्याहत गतयः सर्व्वे सर्व्वत्र महोत्सवेष्विति साधु तत्रैव गच्छामि (अन्तःपुरे गत्वा विलोक्य सविस्मयम्) अरे अग्रे किमेतदवलोकयामि सफलंमे नयनं सफलं मेनयनम्

विभूति भूषित भालस्थलः, कृत धवल केश शिखा बन्धनः, रत्नहार भूषित कण्ठ देशः, मणि वलय समलङ्कृत दक्ष मणि बन्धः, पिहित सुवर्ण शिल्पीकृत धवल पट्टाम्बरः, मङ्गलमय हारिद्र वर्ण वसन कृतोत्तरीयः, सततस्मित वदनः,

विज्ञापयन्निवशङ्कर मयतां, बोधयन्निवाजन्म धर्म्म परतां, सूचयन्निव दोष गरल कवलाय नीलकण्ठतां, वीचयन्निव कर कवली कृत सकल वसु प्रसू वसुमती वलयं, देशयन्निव सराग सत्त्वमयतां, ध्वनयन्निव महोत्सव मुदित मान सहर्ष बहिर्विकशन सूचन मङ्गल पताकाभिरूपतां, काशयन्निव सदा शुतोषतां ब्रह्मर्षिरिव राजर्षिरयं कृतासन परिग्रहो मङ्गलालक्तक सुरञ्जित चरण युगलः किं करोति ।

(आकाशे) किं कथयसि श्रीमतो राम रूपस्य संस्कारइव मणिं भासुरयन् संस्कारइव शष्यं जीवयन् संस्कारइव वसनं रञ्जयन्, नाम करणं नाम वाल संस्कार एवक्रियते श्रीमता

पद्य

एते बिप्रावंश धर्म्मानुसाराद् वेदध्यानं जात कर्म्मानुरूपम् ।
कृत्वा कुर्व्वंस्तस्य वालस्य चायुः शष्यत्तेमं काल वर्षाइ वाद्य॥

अपिच

मन्त्र प्रत्तैर्बर्हिर्षि प्राज्य भारैर्दग्ध्वा दोषं हव्य गन्धैः समन्तात्।
शच्याद्यानां पूजया मातृ काणां भूमिर्भर्त्ता वालमेनं विभर्त्ति॥

इति ।

(विलोक्य) कथमुत्तिष्ठति महाराजः किमेवं कथयसि अन्तःपुरिका परिवृतस्य श्रीमतो रामरूपस्य नाम करणायेति साधु अत्रैवतिष्ठामि अहो कथस्त्वानुभवामि तावदुपस्थित मानन्द मिदानी मावरण मध्यस्थो मातृभिः परि

वृत: श्रीमान् भवतु तावदेनां वृद्धा मन्त: पुर परिचारिकां पृच्छामि (पदान्तरे गत्वा पृष्ट्वा) किं कथयसि।

अङ्के शिशुं परिदधन्नव राम रूप, मानन्द जाश्रुभिरभिप्लुत वक्त्र देश:।
आशा करीन्द्रइवशावक मात्मरूपं, नाम्ना नियोजयतिदीप्ततमेनभूप:॥

अपिच

सानन्द राज रमणी गणवीच्य मानो
माङ्गल्य वस्तु परिपूरित हृष्टि भाग:।
वृद्धाङ्गनाभिरति मोद भरेण कौल
माङ्गल्य गीत परिचुम्बित कर्ण युग्म:॥

(पार्श्वतोऽवलोक्य) अहो किमाश्चर्य्य दर्शनं फल मूल पुष्प परिपूर्ण पात्राणां तदहं शङ्के

मनोरथ फलं प्राप्य, प्रजा: प्रमुदितान्तरा:।
नगाकारेणाहृतानि, फलान्यालोकयन्त्यमुम्॥

(ऊर्द्धमवलोक्य) किमद्भुत दर्शन मुत्सवावलोकनाय प्रासादस्थितानां नगर वधू लक्ष्याणाम्

यथैता:

आरक्त पीत वसना नव वेष भूषा
अङ्कोल्लसत् शिशुगणा: सरलायताच्य:।
आनन्द पूर्ण वदना: परिलोकमाना
आनन्दरूप शिशुकस्य कणा: परीता:॥

(कर्णमूर्द्धीकृत्य सविस्मयं) अरे पुनरपि कोऽयं मधुरान्तरो गभीर नादो दिङ्मण्डल माकुलयति (आकाशे) किं कथयसि श्रीमतो रामरूपस्य नाम

करणानन्द सूचकः पौर जन कोलाहल कवलित त्रिविध बाद्योद्यामविवर्द्धित मधुरान्तरः शतघ्नो नाद इति।

अतोहं तर्कयामि

दिगन्तानां जीता भुवन जन हर्षाम्बुधिरयं
यशः पूरैः पूर्णं सकल जगतामन्तर मिदम्।
सदा कर्त्ता श्रीमानिति पुरजनानन्द कलनैः
शतघ्नीनादोऽयं ध्वनयति महावाद्यनिवहैः॥

अरे किमेतत् किमेतत् पुनरपि याचको घाः क्त कोलाहलाः सीमातिवर्त्ति महोदधिरिव राजपुरं विप्लावयति अधुना पलायन मेवश्रेयः, अन्यथा पूर्व्वरूपं भविष्यति (पदान्तरे गत्वा) एते शिष्ट रूपाइव गच्छन्ति तावदेतान् पृच्छामि कथमद्य जनानां पुनः कोलाहल इति

जन्म दिनएव

एवं नासीज्जनः कश्चिद्, यः प्राप्य धन सञ्चयम्।
सेववद् वर्धकोनस्याद्, राज रत्नाकरं स्पृशन्॥

किं कथयसि दर्शक नजानासि एतेतु सन्निकृष्टा आदिगन्तमा गमिष्यति याचक व्रन्दं वर्षमेक मेवमुत्सवो भविष्यतीति साधुरे साधु

उदिते प्राहृड़म्भोदे, यस्मिन्न कमलोत्सवः।
तस्योषरस्य क्वावासो, हतभाग्यस्य जीवतः॥

(विचिन्त्य) अहो उत्सवस्य कामोहिनी शक्तिः प्रात रारभ्याव लोकमानस्य मे नयनयोरिव प्रायोयामिन्या यामोयातः किमपिनावगतं॥

दिशा पूर्व्वा कस्मिन्नरुण घन रागैः सुललिता
कदावालोकोऽयं प्रखर कर जालेन कलितः।

प्रतीचीवा कस्मिन् जगदधिप भास्वत्कवल कृत्
कदावालोकेऽस्मिन् तिमिरचय पूर्णावसुमती ॥

काकथा दिनैकस्य एवं वहूनि दिनान्यतीतानि धन्यरे उत्सव स्वानन्द भोगीनैवं नित्यं विषयिणोबच्चयन्नायुर्हरसि ॥

(जर्द्धमवलोक्य) अहो किमद्भुत दर्शनं नवोदित कुमुदिनी नायकस्य

तथाहि

पूर्व्वामुपेत्य ककुभं तमसा भिभूता
माहृत्य शीत किरणो जगतां तमांसि
रामोदयेन (१) नयनं प्रणयन् सुधाव्धौ
सम्मज्जनं जयति मानमयो मुखाभः ॥

अपिच

मन्द प्रवात पवनाहृत हैम बिन्दु, सूक्ष्माम्बरावृत सुधाकर एष सद्यः ।
प्रौढ़ाङ्गना सुरतघर्म्म सुधार्द्रवक्त्र, शोभां विड़म्बयति मन्मथ दस्यु दूतः ॥

अस्मिन् चणेहि

हिमस्पर्शी वाती नयन युगल स्पर्श सुभगः
सुधाभासालस्यं जनयति मिलित्वा प्रशभृतः ।
मनःस्थातुं शश्वद्दिशति ततएव प्रणयवन्
नवीनाया लीला लहर रमणीय ध्वनि जुषि ॥

(कर्णमभिनीय) अरे यदेवा शास्यते तदिदमनति दूरे व्यवसित मिवावगम्यते

यतः

स्वराङ्गी भङ्गीनां ललित लहरी साधित रसं

(१) रामः श्रीरामः एषवालः रमणीयताच रामा स्त्री ।

मृदङ्गानां ध्वाने रहसि मणि मञ्जीर मधुरैः ।
कुहूकण्ठो कण्ठो ललित रस सङ्गीत मधुना
घणं मूर्च्छन् मूर्च्छां जनयति मुनीना मपि बलात् ॥

(पार्श्वतीवलोक्य) एते खलु विविधवर्ण मणि भासुर काशीक काश्मीर चीनादि बसन समलङ्कृताः, परिमल सुरभीकृत दिग्विभागा, ताम्बूल रञ्जितौष्ठपुटाः, काम सामन्ताइव पुरुषा, एतदभि गच्छन्ति, तदहमपि सङ्गीत सभाभिनिवेश एतेषामुद्देशः ।

कथं नभवेत्

बसन्तोद्यान विलसन्, मञ्जी बल्लीं विहायन
सोन्मादाः षट्पदाः कस्मिन,बसंति रस लम्पटाः ॥

भवतु तावदेतैर्गच्छामि (पदांतरे गत्वा) श्रहो तावद चैव प्रासार प्राङ्गने जनतीपरुद्ध द्वार देशे भीषण मूर्त्तिरच्चिगण संरच्चिते सङ्गीतालयो भवति, प्रवेश्यं नवा साधारणै राजसद इत्यग्रे गत्वा द्वार पालान् पृच्छामि (पदान्तरे गत्वा पृष्ट्वा) किं कथयसि अस्मिन् महोत्सवे प्वव्याहत प्रवेशाः सर्वं एव प्रदेश्या इति कथं नभवेत् प्राचीनार्य्य मार्ग गामी श्रीमान् (पदान्तरे गत्वा समन्तादवलोक्य) किमद्भुत दर्शनं सभारङ्गस्य

तथाहि युग्मकम् ।

नाना वर्ण विचित्र काच रचना प्रोद्भासि दीपावली
भासाकाशित चत्वरे दिन कृतस्त्र न्द्रस्य शोभा हरे (१) ।
नानाकार सुवर्ण रौप्य रचिते दंण्डादि भिर्मण्डिते
भीमैरुन्नत दर्शनैः सुपुरुषैः संरच्चिते पार्श्वतः ॥

(१) अत्युज्ज्वलत्वाद्दिन कृतः काचा बरणेन शैत्याच्चन्द्रस्य शोभा हरे ।

नानालङ्कृति वेष भूषित तनुर्वाराङ्गना वीथिका
काश्मीरैर्वसनै र्विचित्र रचनै राच्छादिते लीलया।
नृत्यन्ती नव यौवनोन्नति वशान्नम्रां विधायावनीं
शश्वच्छश्वदथ रङ्ग भूमि हसनं कृत्वा वरीनृत्यते॥

अही सम्मुख एव महाराजः क्षत राज राजेश्वर वेषो दिगीशानैरिव साम-न्तनिचयैः स्वस्व तपः फल सम्यदेश भूषणैः पार्श्वतः श्रेयिभिः समलङ्कृत इत एवाभिवर्त्तते।

यदद्य

दिगीशैन्द्राद्यैर्देवैः सदसि सुर नाथस्य मिलिते
जयन्तस्योद्भूत्यै परम महपूर्णं किमथवा।
कुमारस्योत्पत्त्यै शिव सदसि कैलास शिखरे
प्रयातुं वाञ्छाचेन्नयन परिपश्ये दमधुना॥

तत्प्रसादेवगत्वोपविश्य निभृतं सभारङ्ग मवलोकयामि (पदान्तरे गत्वो-पविश्य) साधुरे साधु वासन्तिके

माधुर्य्यैर्जित कोकिलैः स्वरभरैर्दत्वानवां मूर्च्छनां
गम्भीरैश्च मृदङ्ग धीर कलनैः सम्मेरिता मध्यतः।
लग्ने कर्ण सुधामये स्वरशरे शानं स्वराङ्गीस्वरे
सङ्गीतं कुरुषे कुरङ्ग नयने लब्धुं प्रभोः सत्क्रियाम्॥

साधुते लीला नैपुण्यम्

अगाध सुरताम्बुधे रसविहारि मीने चपी
प्रमत्त मदमन्थरद्गुति करीन्द्र मन्दागमे।
प्रदूर घन सञ्चरत्तड़ि दधि चेप प्रदास्योत्सवे

गभीर मव लीलया हरसि चित्त मालोकिनाम् ॥

अपिच

कुचोपरि समुल्लसत् करयुगस्य सङ्घट्टनाद्

दृगार्द्ध मुकुलायिता क्षतिकया प्रसन्नानने ।

गभीर नत कन्धरेऽल सतया स्वरोल्लासिनि

परामृत मवेक्ष्यते सुरतसिन्धु मन्योद्भवम् ॥

किमद्भुत मधुना दर्शनन्ते

गिरः स्खलति सन्ततं परम चन्द्र मुख्याः सुधा

दृशः पतति मन्मथा शुगचयस्य चापभ्रुवः ।

तरङ्गइववै श्रियो वपुषिरूप वारां निधे

र्नविद्मइति विधसो जगति केह सृष्टिः परा ॥

अहो लीलावति वासन्तिके साधुते दृष्टि नैपुण्यम् ।

कस्मिन् पर प्रणयितां क्वचिदेवरोषं

कस्मिन्नु पेचित धियं क्वचिदेव हासम् ।

दृष्ट्या विधाय सकृदेव सुधांशुवक्त्रे

आशा विषाद जलधौ बिलयं करोषि ॥

पुनः किं करोषि स्वराङ्गी बाद्य कण्ठ मालम्ब्य भङ्ग्या गायसि अहह

आयास दर्शित निजालस भाव रम्य

मालम्ब्य पाणि लतया प्रियबाद कण्ठम् (१) ।

अव्याजमन्मथ तरङ्ग क्षताङ्ग पाता

प्रोद्वर्त्तु मादिशसि कं प्रिय कर्ण धारम् ॥

(१) प्रियोवादो यस्येति व्युत्पत्त्या प्रियबादं स्वराङ्गीवाद्यं प्रियवादो नायकश्च।

(विलोक्य) पुनरियं कोत्तिष्ठति

स्नावयन्तीव लावण्यं, चूर्णयन्तीव पिष्टपम्।
जीवयन्तीव कन्दर्पं, मादयन्तीव मानसम्॥

अहो फुल्ल मल्लिकेयं (सादरं) त्वमपि गातुमिच्छसि व्यर्थं आयासः।

यतः

या कैतवेन परुषारुण नेत्र भासो
लेशेन सर्वं धरणी ध्वति दास्य दासी।
तस्याः कथं कथयदेव शर प्रपाते
रायास एष निज किङ्कर वश्यतायै॥

तव दर्शनमात्रेण नयनं निरवधि मुदित मनुभवति किमस्त्यव शिष्टं यदा स्वादयितुं पुनरेष सङ्गीतायासः

यतः

शरच्चन्द्रमसः कान्ते, दर्शना देव तुष्यतः।
करेणा श्रयितुं वाञ्छा, मुग्धस्यैव विडम्बना॥

अथवा गीयतां यतः

संस्कृते रत्न निचये, मणिहारः सुघट्टितः।
किं नधत्तां वधू कण्ठे, शोभां भुवन हारिणीम्॥

साधुते लीला नैपुण्यम्

उल्लासि हास चल लोचन मुच्चलन्ती
निश्वास नर्त्तित कुचोचित भाव रम्यम्।
ओष्ठस्य दंशन लवैः सहशीत्क्रियाद्या
प्रत्येक माह्वयसि दत्त मदं युवानम्॥

अस्मिन्नवसरे

प्रेम्णानियुक्त नयनं प्रतिभाग्यवन्त
मन्यैरलच्य मखिल प्रिय नेत्र भङ्गया: ।
मानेन (१) मान (२) मयि मानिनिपातयन्तो
चेतस्यनङ्गशर सञ्ज्वर मादधासि ॥

किमद्भुतं दृश्यत इदानीम्

भ्रुवाल नील लतिका मभिनर्त्तयन्त्या
वक्त्राम्बुजे नयन षट् पद चालनानि ।
कृत्वास्मिताधर सुधा परिलोभनेन
साचादनङ्ग जयजङ्गम शस्त्रताते ॥

अधुना किं वर्ण्यते

विचित्रं सङ्गीतं नव तनु लताश्चर्य्यवलनं
यदेताभ्यां मुग्धे श्रवण नयने नस्थिर मते ।
किमेतन्मे नित्यं तदिदमनृतं तार्किक मतं (३)
चिदानन्दैकत्वाश्रयण पर वेदान्तिक जय: ॥

साधुरे साधु वासन्तिकामपि विडम्बयितु मिच्छसि किन्तु यदिसा शारद पूर्ण सुधां शुरिव भावि शोचनीया नस्यात् तर्हितवाया सोगगन निष्ठीवनव दूर्द मभि गच्छेत् किं क्रियते कालएष सर्व्वहर्त्ता विहसत्व मधुना वसन्त ज्वालासि

(१) मानेन सङ्गीतस्य मानेन सह समकालमेव ।
(२) मानं चलाया दृष्टेर्विश्रामं क्रिया विशेषम् ।
(३) नैयायिक मते ज्ञान द्वयस्य यौगपद्यं नास्ति अत्रच श्रावणं चाक्षुषं सकृदेव जायते ।

पुनरियंका यथैषा

क्षणस्खलित लोचनारुण लसत् सरोजानना
लतानुदित पल्लवा (१) नवपयोदसौ दामिनी।
बिलासि चल कुन्तला चपित मुग्ध भावा कुला
जलान्तर समुल्ल सन्मणि मयूख वन्मञ्जुला॥

अहो चूतलतिकेयं तिष्ठ तपः फलं पश्यामि तव किं नृत्येनगीतेनवा

यतः

उदयति सौरभ काले, नवाञ्छति परतो मलयाद्रि भूमिः।
बिहग मधुर सङ्गीतं, कुसुम लतायावा चपलत्वम्॥

स्वभावत स्त्वा नवोदित भावो नर्त्तयति कलयतिच गिरा मुदयः तथापि नृत्यसि नृत्यतां साधु

बिस्तार्य्य बेष्टन पठं द्रुत मण्डलेन, लोभ्यं प्रदर्श्य चकितं बरमूरुयुग्मम्।
जालं बिसारयसि किं युवमत्त चेतो, मीनस्य धारणधिया चतुरे रसाब्धौ॥

किमायास भरेणात्मानं खेदयसि क्षणं बिलोकय पतङ्गवद्दीप शिखासु सर्व्वे पतिष्यन्ति

पुनरपि नृत्यसि गायसिच यथेच्छं बिधीयतां सुबर्ण यावत् संश्लिष्यते तावदेव शोभां बिदधाति

आलोल नम्र नव पल्लव लब्ध लीला, मामोदपूर परिपूरित दिग्विभागाम्।
गीतान्तरां परभृतैः स्मरकल्प बल्लि, बाले बिडम्बयसि काञ्चनकाननाभाम्॥

कुचरे अभिमानिनि प्रफुल्ल पुष्पिणिफुल्ल मल्लिके पश्य मुकुलितां चूतलतिकां ज्ञातेऽधुना बासन्तिका जयाशा जितुरपि जिता बर्त्तते यद्भवतु क्वाधुना नयनं पातयामि सर्व्वत्रैव बसन्त राज लक्ष्मीराकर्षति नेत्र युग्मम्।

---

(१) अनुदित पल्लवालतेत्यत्र ईषदर्थेनञ्।

अस्मिन् प्रणीहि

नाहं सहस्त्र नयनस्य करोमि बाञ्छां
धातः घणां नयन लक्ष्य सृष्टो बिधेहि
तस्मात् समस्त सुख सागर मन्थनोत्था
आलोकयामि ऋतु राजक राजलक्ष्मीः ॥

कथम्बा स्थिर मवलोकयामि दुराशा ते नयन

यतः

लावण्य सिन्धु लहरी मणि भूषनानां
बिम्बानु बिम्बित तयोज्ज्वभा बिशेषः ।
खेरायनीय नयनाञ्चल चञ्चलाभि
कृत्तेजितः स्थगयतीक्षणमीक्ष काशाम् ॥

(निभृतमवलोक्य) अरे केयं मधुमासा पचये कुसुम सम्पादां चिन्हमात्रा शेषस्तवक वृन्द मात्र परिशोभिता बासन्तीव भद्री श्याम लतेयं सत्यं शोच नीयावस्थासि पूर्व्वरूप मनुस्मरता

किन्तु यदात्वं गायसि तदा

ताएव मधुरापाङ्ग, स्मित लावण्य सम्पदः
सृज्यन्ते नयनैः पुंसां, मूर्च्छना मुग्ध चेतसाम् ।

कथंविशीर्णासि उत्तिष्ठ कुतस्तवाक्षेपः

यतः

पुष्पंयातु नवीन पल्लवचयो निर्यातु नम्रालता
काठिन्यं भजतां प्रयातु मृदुना वातेन लीला गतिः ।
बासन्तीवत दारुणा तप परिक्लान्तं नपान्थं निज
छाया स्निग्धतले बिनोदयति किं दीनापि दत्वाश्रयम् ॥

यदस्तु अनन्त शाखासु आसु संसार विष बल्लीषु वृथा भ्रमणमालदाद्दाय।
अहो के पुनरेते "गायकाः" यथैते

यासे यथा रुचि चरैः श्रुति मूर्च्छनाभि
रुद्धाव्य भाव समयोचित साधु गीतम्।
आमन्त्रयन्ति विबुधानिव यज्ञ भाग
लीपा द्विषष्ण मनसः पुनरामि हेतोः॥

कः पुनरयं रमणी वेषधरी बालो हाव भावादिका सभि दर्शयन् सभारङ्ग
मा गच्छति अहो नृत्यति हाधिक

मेदं चालय खेलयाङ्ग निचयं भावादिकं दर्शय
भ्रातस्ते बिफलः श्रमः सहृदयस्त्वान्तेवरी वृत्यती।
हेमाम्भोरुह खेलकमलय भृमन्दा निलोम्नासनं
वासन्ती लतिकापलीषु नपुनः शुष्कद्रुमे कामते॥

अहो स्मितमपि करोषि किन्तु

चिलोक तमसां हन्ता, भास्वानस्तु सहायुतिः।
चन्द्रिकायाः पदंनान्यद्, बिनापीयूषमण्डलम्॥
अहो कच्चुकमपि परिसतृसे हाधिक।
सुता धनेन धनिनीं, शुक्तिकामभि पश्यतः॥
स्वातिसर्ग बिहीनायां शुक्तिकायां कुतःस्पृहा॥
अहो गायस्यपि परन्तु
कोकिलस्य कलध्वानः, पुष्पितां माधवी लताम्।
बिहायमरुदेशेषु, नानन्दयति मानसम्॥

अथ बिरम स्थिता स्वेतासु काम रूप राक्षसीषु बिफलः प्रयासो लोका-
नुरञ्जने।

यत:

कएवं वर्त्तते लोके, चक्षुष्मानपि दुर्गत: ।
मणिहार सुपेक्ष्यैव काचं कामयतेतुय: ॥

अतएव

यत्रैव शोभते वस्तु, तत् तत्रैव महीयते ।
चन्द्रमा राजते रात्रौ नपुनर्दिवसागमे ॥

अरे को पुनरेते विचित्ररूपा अहो नाट्य कारिणी दाक्षिणात्या अद्य सर्वेषां विफल: श्रम: । यत:

शारद शशधर किरणे, प्रसरति परितोऽखिलान्धकाराणाम् ।
हन्तरि हन्तन कश्चिद्, वाञ्छति दीपत: प्रकाशजं शर्मं ॥

अपिच

वसन्तोद्यान लक्ष्मीषु, राजन्तीषु वनान्तरे ।
प्रावृषां सम्पद: का: स्यु: कुटज द्रुम सम्भवा: ॥

विशेषतो यूयं वीर रस प्रधाना: काद्य वीर रसस्य कथा ।

यासां स्मरण मात्रेण, दासो भवति भूपति: ।
तासामग्रेक एवंस्याद्, यस्य वैराग्य वासना ॥

विशेषतस्त्वास्मिन् क्षणे

स्मितानां गीतानां हरिण नयनानां चलदृशां
रसानां नृत्यानां नव नव तरङ्गेषु पतितम् ।
किमेवं वस्तूनां यदि दम तलस्पर्श रसिकं
स्वरूपा लोकाय प्रभवति भवे विक्रम भरै: ॥

अरे के पुनरेते वचनानन भङ्ग्या तिरस्कृत भगवाग्देवीश्रादि विलासा: (विलोक्य)

अहो भण्डाः साधु गायन्तु भवन्तः यतोऽस्मिन् चणी पीयूष पान जड़ीभूत रसनाद्द्वाम्ल रसं कल कण्ठीनाद मुदित श्रवण पुटा हास्य रस प्रधानं युष्माकं सङ्गीतं सादरं स्वादयामो वयम्। (सविस्मयम्) अरे किं, किं, कथं मारयत जीर्णोऽयं तरुणो युष्माकं वज्र मुष्ट्यादि प्रहारं कथं सहिष्यति "किं कथयत"

महावंशोत्पन्नोऽमृतमुख विषान्तः कलसभे
कटाक्षे वेश्यानां निहित विभवो मादक रतः।
अकर्म्मण्यो भिक्षा छल मुपगतो द्वारि विचरन्
गृहस्थानां वस्त्रं हरति हतभाग्यः प्रतिदिनम्॥

यथास्माभिरा क्षष्ट इति।

सत्यमेतदवलोकनेनैव प्रतिभाति

मग्ने पङ्कज लोचने अग्निनिभे रेखेतयोः पार्श्वतो
गण्डौ पिण्ड समौ कचाविसकला ओष्ठाधरौ श्यामलौ।
कण्ठो जर्जरित स्तथास्थि निचयो गुल्फौ विशालाकृती
चापाकार तनुश्च नील वसनः साक्षान्मलोमूर्त्तिमान्॥

अरे कथं मारयत श्रीमान् महाराजो वर्त्तते पापानुरूपो दण्डो भविष्यति "किं कथयत" एतेषां मारणमेव श्रेयः।

यतः

कारा गृहेपि गमना, देतेषां पापचारिणाम्।
अलक्ष्मीर्लभते स्थानं, राज्येष्वपि महीभृताम्॥ इति॥

पुनरयं कः यथैषः

पदं स्खलति चालने विकल वेष भूषादिकं
चलत्यरुण लोचनं वदनमस्य मध्या वृतम्।

वचांसि विकला चराणशित पांश लम्बाकृति:
प्रयाति नर पुङ्गवो रुदित हास तुल्यान्तर:॥

अरे मद्यपोऽय माकृष्ट: कुत आकृष्टोऽयं भवद्भि: "किं कथयत" (प्रकृति निर्देशेन) एतासां नर राक्षसीनां ग्रहेष्विति

सत्यं

नचास्ति दुस्कृतं किञ्चित्, तादृशं जगतो तले।
काम चण्डाल दूतीनां, यन्नोदेति गृहे सदा॥

पुनरयं क:, विचित्र वेषालङ्कृति परिभूषित सर्व्वाङ्ग: प्रभो, प्रभो, इति सन्मान वचन विनम्राकृति पुरुष गणै: पश्चात् परिरचित: (किं कथयत) अरे न जानासि अयमस्माकं प्रतिपालयिता महाकुलोत्पन्नो राज सभां प्रविष्ट: श्रीमता साचात् कर्त्तुमिति (सप्रणिधानं विलोक्य) अरे सएषः पूर्व्वं चौरत्वादिनाधृत: कथमेतत्,, धन्या युष्माकं लीला, यश्चौर: सप्रभु (किं कथयत) अरे मूढ़ अस्मांस्त्वं नजानासि

नदुष्ट: साधुर्वा नच नरपति र्नापि वणिजो
रिपुर्वा मित्रंवा कइह भुवने नोऽस्ति सहज:।
प्रदाता देवोनस्तदपर जना: कल्पितरुच:
सदेदं ज्ञाप्यन्ते मनुज निचया हास्यरसत:॥

अरे नभीतिर्व: सभायां शिष्टान् प्रत्येव माख्याने कदाचिद गुरु दण्ड भागिता भविष्यति (किं कथयत) नास्माकं वचसि केपिरुष्टा: जानन्ति सर्वे एते समुचितं कथयन्ति अतएव समुचित वचसि ये क्रुध्यन्ति तेषा मानन स्वतएव मलिनं भवति किञ्च

प्रचण्ड वाक्याङ्कुश धारिणोवयं, नचेद् अवाम: शिरसि प्रघातिन:।

महा मदान्धा धन मत्त कुञ्जराः, सदाहनिष्यन्ति जनान् विचेतसः॥

विशेषतश्च

मामायमानी सिरसां विभूषणं, कत्वा वयं सम्प्रति दत्त पादाः।
सभा सुनोचेदय गर्द्दभ प्रभं, मुखं विधायाभिचराम ईदृशम्॥

यदस्तु भूतार्थं ते कथयामि

यावद्दहन सन्तापी, नभवेन्नचिकालये।
तावन्न मधु लभ्येत, दुष्ट दंश गणैर्वृते॥

साधु धन्या यूयं

जर्द्दमवलोक्य अरे निशीथ समयो जातः

अस्मिन् क्षणेहि

भासं दधत्तुहिन चिकण पल्लवानां
झिल्लीरवेण वलिता खिल दिग्विभागान्।
प्रोल्लासयन् श्रयित दम्पति सेवकश्रीः
श्रीमानसौ शशधरः शिरसोऽभिवर्त्ती॥

अपिच

शून्ये सुधाकर करैर्धवलेऽत्र भासा
दीपेन लौहवर दण्ड चरेण कीर्णे।
भीमाश्चरन्ति पुरुषा वर राजमार्गे
चीत्कार ताड़ित खला नृप दण्ड रूपाः॥

अपिच

नीत्वा करेण चल नूपुर मात्त शङ्काः
एकाम्बरेण पिहिताखिल गात्र भागाः।

घोरं प्रयान्ति कुलटा अभिसार वत्यो
मार्गं व्यतीत्य मदनानल दह्यमानाः ॥

(कर्णमभिनीय) अरे कोऽसौ मधुर नादः (आकाशे) "किं कथयसि" राजद्वारे प्रहर वाद्योऽयमिति यथैषः

स्निग्धान्तरः स्वसमयोचित राग पूर्णो
वेणुस्वरः प्रिय हृदि प्रणयि प्रियाणाम्।
निद्रा सखो विरह कातर कामिनीनां
कर्णे विशन् हृदय शङ्कुरि वावतीर्णः ॥

मध्येमध्येच

श्रान्ते मनो भव तरङ्ग विमर्द्दिताङ्गे
कान्ते हृदि प्रणयतोऽल सभाव पूर्णे ।
प्रौढ़ा विला सजनि पीन कुचावघातं
शङ्खविड़म्बयति घोर मृदङ्ग नादः ॥

(विलोक्य) अरे महाराज उत्तिष्ठति अधुना किं करोमि रात्रिरधिका जाता निद्रा वेशोपि शरीर मवसादयति किन्तु दुर्लभ दर्शनं सहसा खलो हस्य सौभाग्यं यदस्तु परिभ्रम्यावलोकयामि राजपुरं (पदान्तरे गत्वा) विचित्र दर्शन मधुना राजपुरस्य तथाहि

वाम प्रकोष्ठार्पित लौहदण्डा, द्वारेस्थिता रक्षिगणाः प्रचण्डाः।
निष्कम्प तेजः परिहीन दीपा, निद्रामुपेता मनुजाः समस्ताः ॥

अपिच

अश्वक्षुर क्षेप भवा निनादा, गजेन्द्र निश्वास रवा गभीराः।
स्ववीर हुङ्कार गभीर मध्याः, प्रशान्त गम्भीर रसानगर्य्यः ॥

(ऊर्द्ध्वमवलोक्य) अरे पश्यत एवममारुणोदय रञ्जिता प्राची नयनं प्रसादयति अस्मिन् यदिहि

खण्डं खण्डं धवल जलदं धारयन्नील गर्भे
व्योमानूरु प्रथम किरणै रञ्जितान्तः समन्तात्।
फेणा कीर्णं जलनिधि जलं लोहितं रत्न सङ्घै
रुल्लोलान्तः पद्मसुप हसत् कायते कान्त रूपम्॥

अपिच

हीन प्रभो भवति सम्प्रति शीतरश्मि
र्भास्वान् गृहीत भुवनो लभते विकाशम्।
कालो निबोधयति सम्प्रदि मत्त लोकान्
म्लादं नृणां विषयजं चपला विलासम्॥

अपिच

आशा समस्ता खिल जन्तु रावैः, कीर्णा विकाशं लभते क्रमेण।
कल्पान्त काले ष्विवलीन तत्त्वा, पुनर्विकाशं प्रकृतिः करोति॥

अधुना महाराजः किं करोति द्रष्टव्यं तत् पदान्तरे गत्वा कएष कलनादः अहो बन्दी रवः, यथैषः।

उत्तिष्ठ भूप परिमुञ्चत मोऽभिभूति
मुन्नाद्य प्रकृतिमात्म विलोकनेन।
भूपाल मौलि मणि रञ्जित पादपीठ
सर्व्वावलोकन विधिस्त्वयि लोकनाथः॥

अपिच

आताम्र गर्भ किरणै स्तमसां निहन्ता

भानुर्निवेदयति ते भुवनस्य कालम्।
कालात्ययं यदि करोषि तमोऽभिभूतो
लोकाः कथं नियत मार्ग चरा भवेयुः॥

पदान्तरे गत्वा (बिलोक्य) अहो अखवत एव श्रीमान जातः कृतासन परिग्रहः समन्तात् शिष्ट मण्डल परिवृतः सन्ध्या मुपास्ते

किमद्भुत दर्शनमिदानीं श्रीमतः तथाहि

बद्धासनः समुचितासन लब्धमानो, नासाग्रचालित दृशा पर तत्व दर्शी।
प्राणावरोधन नियन्त्रित वृत्तिवृन्दः, साक्षाद्विराजति हरः किमुयोगिराजः॥

अहो पश्यत एवमे बहु विलम्बो जातः किन्तु श्रीमतः समक्ष मुज्झितुं न बाञ्छति चेतः यतइदं स्थान ममरावती मप्युपहसति तथाहि

आलम्ब्य सौरभभरं कुसुमावलीनां, शीतीवहा कणवहाः पवनाः प्रयान्ति।
बीणादि यन्त्ररणनेन सहप्रमोदाः, कूजन्ति कोमल मनोज्ञरवाः पतङ्गाः।

(विलोक्य) इदमप्यद्भुत दर्शनं पुनरुत्तराभि मुखस्य वाम हस्त तलार्पित पार्थिव लिङ्गस्य स्वमिवध्यायतो योगि राजस्य श्रीमतः अहो किमिते गायन्ति

तथाहि

दुर्जन बिकल धरातल तारण कारण धृत नर देहं
निज करुणाम्बुधि पावित बहु सुकृताश्रय नरपति गेहम्।
रामं क्षिति तल विहित विलासं
नयन विलोकय जगदधिवासम्॥ १॥ ध्रुवम्॥
अङ्कुश केतु कुलिश कमलादिक चिह्नित चरण सरोजं
तरुण तरणि कर निन्दि चरण तल रूप विरूप मनोजम्॥ २॥
नव धन गञ्जन भुवन दृगञ्जन हृदय रसायनरूपं
नश्वर विमर्हित नवविधु गौरव ताप शमन रस कूपम्॥ ३॥

ऊरु तिरस्कृत करभ कर ललित वर्त्तुल पीन नितम्बं
पङ्कज चिन्हित नाभि कूप परिभावित भूप कदम्बम् ॥ ४ ॥
धृष्ट दुष्टचय मर्द्दन लम्पट निर्दय हृदय कवाटं
जानु देशगत बाहु बलियुग दर्शित दनुज विपाटम् ॥ ५ ॥
कम्बु कण्ठ शुक नासिक पङ्कज लोचन ललित कपोलं
भ्रूधनु रञ्जित वदन सुधाकर मरुणाधर मति लोलम् ॥ ६ ॥
शुक्ति विनिन्दन कर्ण सुशोभन खर्व्व कचोज्ज्वल शीर्षं
दुष्ट निशाचर दरसुर किन्नर भावन भावित हर्षम् ॥ ७ ॥
दुर्ज्जन वारण सज्जन तारण मुनिगण मानस हंसं
सुर नर किन्नर मुकुट महामणि जन्म पवित्रित वंशम् ॥ ८ ॥

अहो श्रीमान् यदा यदा यादृशावस्था मुपगच्छति तदैव तादृशावस्थामति वाहयति श्रीमज्जन्म महोत्सवानन्देन कथं न भवेत् भवे किमस्य धिकमस्मात् सुख कारणम् ।

अतएव

नग्नं जटाधरं धूलि, धूसराङ्गं सदा सुखम् ।
भाग्यवन्तः प्रपश्यन्ति, गृहेवालं सदाशिव मिति गीयते ॥

(निष्क्रम्योर्द्ध्वमवलोक्य) अहो मध्याह्न समयो जातः

तथाहि

भानुः प्रचण्डः पवनोऽतिरुक्षो, व्यग्रा मनुष्या जठरानलेन ।
कूजन्ति वृक्षान्तर लब्ध वासा, रहः पतङ्गाः कठिनस्वनेन ॥

अपिच

वमन्ति गन्धं हविषोऽनलेषु, हुतस्य गेहाः परियाजकानाम् ।

द्वारि गृहस्थस्य लसन्ति दीना, महा बुभुक्षानल दग्ध देहाः॥

अहो एतावान् समयोऽतीतः श्रीमतो वैध कर्म्मावलोकनेन किमपिनज्ञातं धन्यः श्रीमान खण्ड भूमण्डलाधिपति रपि विषयाना सक्तो वैध कर्म्म पर एकासनेनै तावन्तं समय मति वाहयति सन्देहः खल्वेकः नित्यमेव मघवा-दैव (आकाशे) "किं कथयसि" नित्यमेवं श्रीमतः अद्य वरं समागतानां महो भद्रादीनां समुचित व्यवहार सम्पादनाय श्रीमान् सत्वरं क्षत नित्य क्रिय इति कथं नभवेदन्यथा मुक्ति क्षेत्रा (१) धिपत्यं दुर्लभं क्षमाकार्य्या धनिनां सहचारमवलोकय तैव मुक्तम्।

(विलोक्य) अरे कएते

जीर्ण कम्बल संलम्बा, च्छिन्न कौपीन धारिणः

धूलि धसर सर्व्वाङ्गाः, शीर्ण देहाविचेष्टिताः॥

(आकाशे) किं कथयसि, अरे न जानासि एते यवन साधवः अद्य कुमार जन्म महोत्सवे समाहूता भिक्षार्थमागता इति (सविस्मयं) "कथमेतत् ब्रम्हर्षि कल्पस्य वर्णाश्रमिणो गृहे यवनाः "किं कथयसि" धिङ् मूर्ख न जानासि सर्व्व धर्म्मोत्साहिभि भूपतिभिर्भवितव्य मन्यथा सर्व्वेषां पालनं कथं भवेदिति सत्यमज्ञस्य कोविवेकः क्षन्तव्योऽपराधः

यदस्तु किमद्भुत दर्शन मेषां तथाहि

दृष्टिस्तृणी क्षत जगत् त्रय भोग्य जाता

दैन्यास्तैन परिपूरित चित्त वृत्तिः।

सर्व्वाधिकत्व मव बोधयतीव नित्यं

भावोदयः किमपि सत्त्व भवो गरीयान्॥

(१) मुक्ति क्षेत्र मयोध्या काशीच।

अरे की पुनरेते गैरिक रङ्गरञ्जितचीर परिभूषित कटिदेशा मुण्डित मुण्डा दण्डधरा: स्थविरा: "किं कथयसि" एते सन्यासिन: किमधिकं ये यत्र महा त्मान: ते सर्व्वे तत्र आगमिष्यन्त्यत्र महोत्सवेष्विति (सविस्मयं) नचेदेवं कथं राजान: (बिलोक्य) अहो दर्शनीयते दानीमे तेषां भोजनादिना तोषितानां पूजार्थं सर्व्वे परिभ्रमत: प्रणतस्य श्रीमत: तथाहि

मण्डलेन समासीन, दण्डि मण्डल मध्यग:।
मूर्त्तिमानिव धर्म्मोऽयं, ददाति फल मुत्तमम्॥ (१)

(विलोक्य) अरे प्रासाद प्राङ्गने प्रसन्न बदनो राज पुरुषै: समलङ्कृतो महाराज: किं पश्यति (किं कथयसि) न जानासि येनाव सरतोषणी या राजान इति शिल्पिनो स्मिन् महोत्सवे स्वशिल्प नैपुण्यं प्रदर्श्य स्वमानुरूपं पारितोषिकं प्राप्तुकामा इति साधु धन्या श्रीमती राज नगरी

यत:

नचैवं वर्त्तते किञ्चिद्, भुवने शिल्प पाटवम्।
जायते यत्रराज्येषु, पाक शासन सम्पद:॥

(पदान्तरे गत्वा बिलोक्य) के पुनरेते मुण्डित मुण्डो परि बिराजमान नानाकारोष्णीष रचना, स्तप्तकाञ्चन वर्णाभा, भाल शोभित बिचित्रतिलका: (सविस्मयं) अरे रच रच एते किं कुर्व्वन्ति मुष्टामुष्टि सन्निकृष्टशरीरा, बिशृङ्खलोष्णीषधरा, ओष्ठ निर्गत फेन बिन्दवो, भाल चालित लोहित लोचना, बिकृतस्वरा रुत्तवादिन: "किं कथयसि" अरे मूढ़ न जानासि एते पण्डिता: कथा प्रवृत्ता: परस्परं जिगीषयात्म गौरव वृद्धि कामा:। यतइयं राजसभा अस्यां यो बिजयी भवेत् तस्यादिगन्त आगमिष्यति प्रतिष्ठेति

(१) उत्तमं फलमेलादिकं भुखशुद्धार्थं पक्षे तादृश सम्मान रूपं तप: फलम्।

(सापराधमिव) सत्यमपराद्धोस्मि पूज्याना मवज्ञावचोभि रेतैषां रुच व्यवहारेण मतिरा कुला जाता (स्वगतं) हाधिक् काल वशेनशास्त्राणामीदृशी दुर्गति र्जाता भो महात्मानः विरमत ज्ञातं वो विद्या कौशलम् ।

पुरार्थ्य विद्या परमार्थ दर्शिनी, भवाम्बुधि क्लेष विनाश कारिणी।
निवात निष्कम्प शिख प्रदीपव, च्चकार वृत्तिंसततं महात्मनाम्॥

सैयमिदानीम्

अनात्मवन्द्वै र्विवृता निरर्थकैः, पदैर्विशाला लभते पदाहतिम् ।
असीम भषान्तर पातनिष्प्रभः, शिखीव सर्व्वा वरणाहतिघ्नमः॥

यदस्तु समयानुसारी भगवतः सङ्कल्पः अनीशा वयं तत्र (विलोक्य) अहो का चमत्कारिणी कालस्य गतिः पश्यत एवमे पुनरेव सायं समय उपस्थितः अरे कोऽयं कोलाहलै र्वाद्योद्यमः श्रूयते (आकाशे) "किं कथयसि" न जानासि अद्य सर्व्व देवालयेषु श्रीमतः कुमारस्य मङ्गलार्थ मुत्सवो भवतीति साधु कथं नभवेत् धर्म्मपालः श्रीमान् धर्म्मएव कल्याण हेतु रिति उचित एव धर्म्मोत्साहो धर्म्म पालानां अतएव वयमपि प्रार्थयामः ।

देवद्विजाशीर्वचनेन वालो, भूत्वा कुलाना मनुरूप वृत्तिः ।
सम्बन्धिभिः कण्टकहीन राज्यं, भुनक्तु नित्यं चिरजीवनेन ॥

इति निष्क्रान्तः ।

॥ समाप्त मिदं शुभमस्तु ॥

॥ शुद्धिपत्रम ॥

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
३	१२	विषत्रं	विषपणं
५	९	श्यसेषु	आसेषु
७	४	कुर्म्मी	कुर्म्मः
७	२१	देयदेय	देयंदेय
८	१०	शान्त	शान्तः
८	१२	गृहोन्विव	गृहोत्विव
८	१९	शीर्षै	शीर्षै
१०	५	तरङ्कित	तरङ्कित
१०	१३	अहीं	अहो
११	१५	यतोः	यतो
१४	२२	आनन्द्र	आनन्द
१५	६	वीच्यमानो	वीच्यमाणो
१६	१३	नासीजन	नास्तिजन
१७	१८	लहर	स्फुरण
१८	१४	अस्मिन्	अत्र
१९	१२	दधिच्चेपप्रदास्योत्सवे	दरिष्टवक्षोत्सवे
२१	२१	क्रियाव्या	क्रियाभ्या
२२	७	भ्रु	भ्रू
२३	९	लतायावा	लतायाह्वि
२३	१२	पठं	पटं
२४	८	भूषनानां	भूषणानां

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२४	१३	वृन्द	वृन्त
२४	१८	विशीर्णा	विशीर्णा
२५	१६	परिसत्ते	परिधत्ते
२७	१२	अशिति	असित
२७	१३	विसकला	विशवाला
२९	१०	घणोहि	घणेहि
३०	१९	होन	हीन
३१	१६	वन्दी	वन्दि
३१	१८	मुद्रावय	मुद्रासय
३२	२१	धन	घन

1231.

पुस्तकानां सूचीपत्रम्।